CC-0. In Public Domain. Digitization by eGangotri

नं. ३१२

॥ श्रीगोरक्षनाथकृत

सिद्धसिद्धान्तपद्धतिः ॥

Acc-32684
32765

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्री ॥

॥ श्रीगोरक्षनाथकृत-सिद्धसिद्धान्तपद्धतिः ॥

प्रथमोपदेशः ।

॥ श्रीगणेशाय नमः ॥

आदिनाथं नमस्कृत्य शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥ १ ॥

नास्ति सत्यविचारेऽस्मिन्नुत्पत्तिश्चाण्डपिण्डयोः ।
तथापि लोकवृत्त्यर्थं वक्ष्ये सत्सम्प्रदायतः ॥ २ ॥

सा पिण्डोत्पत्त्यादिः सिद्धमते सम्यक् प्रसिद्धा ।
पिण्डोत्पत्तिः पिण्डविचारः पिण्डसंवित्तिः
पिण्डाधारः पिण्डपदसमरसभावः श्रीनित्यपिण्डावधूतः[1] ॥ ३ ॥

यदा नास्ति स्वयंकर्ता कारणं न[2] कुलाकुलम् ।
अव्यक्तं च परं ब्रह्म अनामा विद्यते तदा ॥ ४ ॥

अनामेति स्वयंमनादि सिद्धमेकमेवानादिनिधनं
सिद्धसिद्धान्तप्रसिद्धं तस्येच्छामात्रधर्माधर्मिणी
निजा शक्तिः प्रसिद्धा ॥ ५ ॥

तस्या उन्मुख[3]मात्रेण परा शक्तिरुत्थिता ।
तस्या[4]स्पन्दनमात्रेण अपरा शक्तिरुत्थिता ॥ ६ ॥

ततोऽहन्तार्ध[5]मात्रेण सूक्ष्मशक्तिरुत्पन्ना ।
ततो वेदनशीला कुण्डलिनी शक्तिरुद्गता ॥ ७ ॥

१ – श्रीनित्यावधूत (ह.). २ – न (यो. तं.). ३ – उन्मुखत्व (ह.).
४ – तस्य (ह.). ५ – अहन्तार्थं (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्त्र ३१२

नित्यता निरञ्जनता निस्पन्दता निराभासता ।
निरुत्थानता इति पञ्चगुणा निजा शक्तिः ॥ ८ ॥

अस्तिता अप्रमेयता अभिन्नता अनन्तरता ।
अव्यक्तता इति पञ्चगुणा परा शक्तिः ॥ ९ ॥

स्फुरत्ता स्फुटता स्फारता स्फोटता स्फूर्तिता ।
इति पञ्चगुणा अपरा शक्तिः ॥ १० ॥

निरंशता निरन्तरता निश्चलता निश्चयता ।
निर्विकल्पता इति पञ्चगुणा सूक्ष्मा शक्तिः ॥ ११ ॥

पूर्णता प्रतिबिम्बता प्रबलता प्रोच्चलता ।
प्रत्यङ्मुखता इति पञ्चगुणा कुण्डलिनी शक्तिः ॥ १२ ॥

एवं शक्तितत्वे पञ्च - पञ्च - गुण - योगात्परपिण्डोत्पत्तिः॥१३॥

उक्तञ्च :—

निजा पराऽपरा सूक्ष्मा कुण्डली तासु[६] पञ्चधा ।
शक्तिचक्रक्रमेणोत्थो[७] जातः पिण्डः परः शिवः[८] ॥ १४ ॥

अपरम्परं परमं पदं शून्यं निरञ्जनं परमात्मेति ।
अपरम्परात्स्फुरत्ता - मात्रमुत्पन्नं परमपदात्भावना -
मात्रमुत्पन्नम् शून्यात्स्वसत्तामात्रमुत्पन्नं निरञ्जनात्स्व-
साक्षात्कारमुत्पन्नं[९] परमात्मनः परमात्मोत्पन्नः ॥ १५ ॥

अकलङ्कत्वमनुपमत्वमपारत्वममूर्तत्वमनुदयत्वमिति
पञ्चगुणमपरम्परम् ॥ १६ ॥

निष्कलत्वमणुतरत्वमचलत्वमसंख्यत्वमपारत्वमिति[१०]
पञ्चगुणं परमं पदम् ॥ १७ ॥

६–कुण्डलिन्यासु (ह.), कुण्डलीतासु (का). ७–क्रमेणोत्थः (ह.), क्रमेणैव (का.). ८–शिवे (का.). ९–साक्षात्कारमात्रमुत्पन्नं (ह.). १०–आधारत्वं (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीलता पूर्णता उन्मनी लोलता मूर्च्छता इति पञ्चगुणं शून्यम् ।। १८ ।।

सत्यत्वं सहजत्वं समरसत्वं सावधानत्वं सर्वगत्वमिति पञ्चगुणं निरञ्जनम् ।। १९ ।।

अक्षय्यत्वमभेद्यत्वमछेद्यत्वमदाह्यत्वमविनाशित्वमितिपञ्चगुणो परमात्मेति अनाद्यपिण्डस्य पञ्चतत्वपञ्चविंशतिगुणाः ।। २० ।।

उक्तञ्च :—

अपरम्परं परमपदं शून्यं निरञ्जनं परमात्मनः
पञ्चभिरेतैः सगुणैरनाद्यपिण्डः समुत्पन्नः ।। २१ ।।

अनाद्यात्परमानन्दः परमानन्दात्प्रबोधः प्रबोधाच्चिदुदयः
चिदुदयात्प्रकाशः प्रकाशात्सोऽहम्भावः ।। २२ ।।

स्पन्दः हर्षः उत्साहः निस्पन्दः नित्यसुखत्वमिति पञ्चगुणः परमानन्दः ।। २३ ।।

उदयः उल्लासः अवभासः विकासः प्रभा इति पञ्चगुणः प्रबोधः ।। २४ ।।

सद्भावः विचारः कर्तृत्वं ज्ञातृत्वं स्वतन्त्रत्वमिति पञ्चगुणः चिदुदयः ।। २५ ।।

निर्विकारत्वं निष्कलत्वं निर्विकल्पत्वं समता विश्रान्तिः इति पन्चगुणः प्रकाशः ।। २६ ।।

अहन्ता ऽखण्डैश्वर्यं स्वात्मता विश्वानुभवसामर्थ्यं सर्वज्ञत्वमिति पन्चगुणः सोऽहम्भावः ।। २७ ।।

इति आद्यपिण्डस्य पन्चतत्वं पन्चविंशतिगुणाः ।। २८ ।।

उक्तञ्च :—

परमानन्दः प्रबोधः चिदुदयः चित्प्रकाशः ।
सोहम्भाव इत्यन्तः आद्यपिण्डो महातत्त्वैर्गुणयुक्तः समुत्थितः ।। २९ ।।

११—लीनता (ह.) नीलता, (का.). १२—महातत्वयुक्तः (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आद्यान्महाकाशः महाकाशान्महावायुः महावायोर्महातेजः ।
महातेजसो महासलिलं महासलिलान्महापृथ्वी ॥ ३० ॥

अवकाशः अच्छिद्रमस्पृशत्वं नीलवर्णत्वं
शब्दवत्वमिति पञ्चगुणो महाकाशः ॥ ३१ ॥

सञ्चारः सञ्चालनं स्पर्शनं शोषणं धूम्रवर्णत्वमिति
पञ्चगुणो महावायुः ॥ ३२ ॥

दाहकत्वं पाचकत्वमुष्णत्वं प्रकाशत्वं रक्तवर्णत्वमिति[13]
पञ्चगुणं महातेजः ॥ ३३ ॥

प्रवाहः आप्यायनं द्रवः रसः श्वेतवर्णत्वमिति
पञ्चगुणं महासलिलं ॥ ३४ ॥

स्थूलता नानाकारता काठिन्यं गंधः पीतवर्णत्वमिति पञ्चगुणा
महापृथ्वी इति महासाकारपिण्डस्य पञ्चतत्त्वं
पञ्चविंशतिगुणाः ॥ ३५ ॥

स एव शिवः शिवाद्भैरवो भैरवात् श्रीकण्ठः श्रीकण्ठा-
त्सदाशिवः सदाशिवादीश्वरः ईश्वराद्रुद्रो रुद्राद्विष्णु-
र्विष्णोर्ब्रह्मा इति महासाकारपिण्डस्य मूर्त्यष्टकम् ॥ ३६ ॥

तत्तद्ब्रह्मणः सकाशादवलोकनेन नरनारीरूपः प्रकृतिपिण्डः
समुत्पन्नस्तच्च पञ्चपञ्चात्मकं शरीरमिति ॥ ३७ ॥

अस्थि - मांस - त्वक् - नाडी - रोमाणि इति पञ्चगुणा भूमिः ॥ ३८ ॥

लाला मूत्रं शुक्रं शोणितं स्वेद इति पञ्चगुणा आपः ॥ ३९ ॥

क्षुधा तृषा निद्रा क्लान्ति आलस्यमिति पञ्चगुणं तेजः ॥ ४० ॥

धावनं प्लवनं[14] प्रसारणमाकुञ्चनं निरोधनमिति पञ्चगुणो वायुः ॥ ४१ ॥

१३-पावकत्वम् (ह. का.). १४-अवनम् (त.), भ्रमणां (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागो द्वेषो भयं लज्जा मोह इति पञ्चगुण आकाशः
इति पञ्चविंशतिगुणानां भूतानां प्रकृतिपिण्डः ।। ४२ ।।

मनोबुद्धिरहङ्कारश्चित्तं चैतन्यमित्यन्तःकरणपञ्चकम् ।। ४३ ।।

संकल्पः विकल्पः मूर्च्छा जडता मननमिति पञ्चगुणं मनः ।। ४४ ।।

विवेको वैराग्यं शान्तिः सन्तोषः क्षमा इति पञ्चगुणा बुद्धिः ।। ४५ ।।

अभिमानं मदीयं मम सुखं मम दुःखं ममेदमितिपञ्चगुणोऽहंकारः ।।४६।।

मतिर्धृतिः स्मृतिस्त्यागः स्वीकारः इति पञ्चगुणं चित्तम् ।। ४७ ।।

विमर्शः तच्छीलनं धैर्यं चिन्तनं निस्पृहत्वमिति पञ्चगुणं
चैतन्यम् — एवं अन्तःकरणगुणाः ।। ४८ ।।

सत्वं रजस्तमः कालो जीव इति कुलपञ्चकम् ।। ४९ ।।

दया धर्मः कृपा भक्तिः श्रद्धेति पञ्चगुणं सत्त्वम् ।। ५० ।।

दानं भोगः शृङ्गारः वस्तुग्रहणं स्वार्थमिति पञ्चगुणं रजः ।। ५१ ।।

विवादः शोकः कलहः बंधः वञ्चनमिति पञ्चगुणं तमः ।। ५२ ।।

कलना कल्पना भ्रान्तिः प्रमादोऽनर्थ इति पञ्चगुणः कालः ।। ५३ ।।

जाग्रत् स्वप्नः सुषुप्तिस्तुर्यं तूर्यातीतमिति पञ्चावस्थागुणोजीवः ।। ५४ ।।

इच्छा क्रिया माया प्रकृति वाक् इति व्यक्तिशक्तिपञ्चकम् ।। ५५ ।।

उन्मादो वासना वाञ्छा चिन्ता चेष्टेति पञ्चगुणा इच्छा ।। ५६ ।।

स्मरणमुद्योगः कार्यं निश्चयः स्वकुलाचार इति पञ्चगुणा क्रिया ।।५७।।

मदो मात्सर्यं दम्भः कृत्रिमत्वं असत्यमिति पञ्चगुणा माया ।। ५८ ।।

आशा तृष्णा स्पृहाकांक्षा मिथ्या इति पञ्चगुणा प्रकृतिः ।। ५९ ।।

१५–शीलनम्–(ह. तं.). १६–क्रिया (ह.). १७–स्वार्थसंग्रहणमिति (ह.), स्वार्थादाने (का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परा पश्यन्ती मध्यमा वैखरी मातृक इति पञ्चगुणा वाक्
इति पञ्चगुणा व्यक्तिशक्तिः पञ्चविंशतिगुणा ॥ ६० ॥

कर्म कामश्चन्द्रः सूर्यः अग्निरिति प्रत्यक्षकरणपञ्चकम् ॥ ६१ ॥

शुभमशुभं यशः अपकीर्तिः अदृष्टफलसाधन-
मिति पञ्चगुणं कर्म ॥ ६२ ॥

रतिः प्रीतिः क्रीडा कामना आतुरता इति पञ्चगुणः कामः ॥ ६३ ॥

उल्लोलिनी[18] कल्लोलिनी उच्चलन्ती उन्मादिनी तरंगिणी
शोषिणी अलम्पेटा[19] प्रवृत्तिः लहरी लोला लेलिहाना
प्रसरन्ती प्रवाहा सौम्या प्रसन्ना प्लवन्ती एवं चन्द्रस्य
षोडश कलाः सप्तदशी कला निवृत्तिः साऽमृतकला ॥ ६४ ॥

तापिनी ग्रासिका उग्रा आकुंचिनी शोषिणी प्रबोधिनी स्मरा
आकर्षिणी तुष्टिवार्द्धिनी उर्मीरेखा किरणावती[20] प्रभावतीति
द्वादश कलाः सूर्यस्य त्रयोदशी स्वप्रकाशता निजकला ॥ ६५ ॥

दीपिका राजिका[21] ज्वलिनी[22] विस्फुलिंगिनी प्रचण्डा पाचिका
रौद्री दाहिका[23] रागिणी शिखावतीति अग्नेर्दश कलाः
एकादशी कला ज्योतिरिति प्रत्यक्षगुणकलासमूहः ॥ ६६ ॥

अथ नाडीनां दश द्वाराणि ॥

इडा पिङ्गला च नासाद्वारयोर्वहतः
सुषुम्ना तालुमार्गेण ब्रह्मरन्ध्रपर्यन्तं वहति
सरस्वती मुखद्वारेण वहति पूषाऽलम्बुषा च चक्षुद्वार-
योर्वहतः गान्धारी हस्तिजिह्विका च कर्णद्वारयोर्वहतः
कुहूः गुदद्वारे वहति शंखिनी लिङ्गद्वारे वहति (सा

१८-उल्लोला (ह.). १९-लम्पटा (ह. तं.). २०-किरणवती (ह.), किरणिनी (का.). २१-रंजिका (ह.). २२-ज्वालिनी (ह. तं.), २३-वाहका (तं.), दाहा (का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डमार्गेण ब्रह्मरन्ध्रपर्यन्तं वहति) एवं[२४] दशद्वारेषु वहन्ति (अन्या सर्वा नाड्यो[२५] रोमकूपेषु वहन्ति) ॥ ६७ ॥

अथ दशावयवः ॥

हृदये प्राणवायुः उच्छ्वास-निश्वास-कारको हकार-सकारात्मकश्च[२६] । गुदे त्वपानवायुः रेचकः कुम्भकश्च[२७] । नाभौ समानवायुः दीपकः पावकश्च[२८] । कण्ठे[२९] व्यानवायुः शोषणाप्यायनकारकश्च । तालौ उदानवायुः ग्रसन-वमन-जल्पकारकश्च । नागवायुः सर्वाङ्गव्यापकः मोचकश्चालकश्च[३०] । कूर्मवायुः चक्षुषोरुन्मेष-कारकश्च[३१] । कृकलः उद्गारकश्च क्षुत्कारकश्च । देवदत्तो मुखे विजृम्भकः । धनञ्जयो नाद घोषक इति दशवायुरवलोकनेन पिण्डोत्पत्तिः नरनारीरूपम् ॥ ६८ ॥

अथ गर्भोलिपिंडोत्पत्तिः ॥

नरनारीसंयोगे ऋतुकाले ॥ ६९ ॥

रजोबिन्दुसंयोगे सः जीवः
प्रथमदिने कललं[३२] भवति सप्तरात्रे बुद्बुदाकारं भवति ।
अर्द्धमासे गोलाकारं भवति मासमात्रे कठिनं भवति ।
मासद्वयेन शिरो भवति तृतीये मासि हस्तपादादिकं भवति ।
चतुर्थे मासि चक्षुकर्णादि-नासिका-मुखं मेढ्रं[३३] भवति ।
पञ्चमे मासि पृष्ठोदरौ भवतः षष्ठे मासि नखकेशादिकं भवति ।
सप्तमे मासि सर्वचेतनयुक्तो भवति अष्टमे मासि सर्वलक्षण-संयुक्तो भवति नवमे मासि सत्यज्ञान[३४]गर्भसंयुक्तो भवति ।
दशमे मासि योनिसंस्पर्शादज्ञानी बालको भवति ॥ ७० ॥

२४-नास्तिवाक्यमिदम्(ह.). २५-नास्ति वाक्यमिदम् (ह.). २६-"अस्यैवावस्थाभेदे हठ्योग इति संज्ञा हकारः कीर्तितः सूर्यष्ठकारश्चन्द्र उच्यते । सूर्याचन्द्रमसोयोगात् हठ्योगो निगद्यते"। अधिकोऽयं पाठः (ह.). २७-कुम्भकपूरकश्च (ह.). २८-पाचकश्च (ह.). २९-सर्वाङ्गे(ह.). ३०-शब्दोऽयं नास्ति (ह.). ३१-कुम्भकश्चक्षु (ह.). ३२-कलनं (यो.), कलिलं (का.). ३३-मेढ्रं गुदं (ह. का.). ३४-सत्यज्ञानयुक्तः (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुक्राधिक्ये पुरुषः रक्ताधिक्ये कन्या समशुक्ररक्ताभ्यां नपुंसकः परस्पर - स्त्री - पुरुष - चिन्ता - व्याकुलत्वादन्धः कुब्जः वामनः पङ्गुरङ्गहीनश्च भवति ।। ७१ ।।

परस्पररतिकाले अङ्गनिपीडनकरणगुणैः शुक्रं द्वित्रिवारं पतति तेन द्वितीयो बालको भवति ।। ७२ ।।

सार्द्धपलत्रयं शुक्रं विंशतिपलं रक्तं द्वादशपलं मेदः दशपलं मज्जा शतपलं मांसं विशंतिपलं श्लेष्मा तद्वत् वातं स्यात् षष्ट्यधिक - शत - त्रयमस्थीनि अस्थिमात्रं सन्धयः सार्द्धत्रय - कोटिरोमकूपाणि पितृमातृवीर्यं भवति । वात - पित्त - श्लेष्मधातुत्रयसहितं दशधातुमयं शरीरमिति गर्भोलिं[३५] पिण्डोत्पत्तिः ।। ७३ ।।

इति गोरक्षनाथ-कृतौ सिद्धसिद्धान्तपद्धतौ पिण्डोत्पत्तिर्नाम प्रथमोपदेशः ।। १ ।।

३५—गर्भपिण्डोत्पत्तिः (का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयोपदेशः

अथ पिण्डविचारः कथ्यते ॥

पिण्डे नवचक्राणि ॥ आधारे ब्रह्मचक्रं त्रिधावर्तं भगमण्डलाकारं तत्र मूलकन्दः तत्र शक्तिं पानाकारां[1] ध्यायेत् तत्रैव कामरूपं पीठं सर्वकामप्रदं[2] भवति ॥ १ ॥

द्वितीयं स्वाधिष्ठानचक्रं तन्मध्ये पश्चिमाभिमुखं लिङ्गं प्रवालाङ्कुरसदृशं ध्यायेत् तत्रैवोड्यानपीठं जगदाकर्षणं भवति ॥ २ ॥

तृतीयं नाभिचक्रं पञ्चावर्तं सर्पवत्कुण्डलाकारं तन्मध्ये कुण्डलिनीं शक्तिं बालार्ककोटिसदृशीं ध्यायेत् सा मध्या शक्तिः सर्वसिद्धिदा भवति ॥ ३ ॥

चतुर्थं हृदयाधारमष्टदलकमलमधोमुखं तन्मध्ये कर्णिकायां लिङ्गाकारां ज्योतिर्ध्यायेत् सैव हंसकला सर्वेन्द्रियवश्या[3] भवति ॥ ४ ॥

पञ्चमं कण्ठचक्रं चतुरंगुलं तत्र वामे इडा चन्द्रनाडी दक्षिणे पिङ्गला सूर्यनाडी तन्मध्ये सुषुम्नां ध्यायेत् सैवानाहतकला अनाहतसिद्धिर्भवति ॥ ५ ॥

षष्ठं तालुचक्रं तत्रामृतधाराप्रवाहः घंटिकालिङ्गं मूलरन्ध्रं राजदन्तं शंखिनीविवरं दशमद्वारं तत्र शून्यं ध्यायेत् चित्तलयो भवति ॥ ६ ॥

सप्तमं भ्रूचक्रं मध्यमाङ्गुष्ठमात्रं ज्ञाननेत्रं दीपशिखाकारं ध्यायेत् वाचां सिद्धिर्भवति ॥ ७ ॥

अष्टमं ब्रह्मरन्ध्रनिर्वाणचक्रं सूचिकाग्रवेध्यं धूमशिखाकारं ध्यायेत तत्र जालन्धरपीठं मोक्षप्रदं भवति ॥ ८ ॥

---

१ – पावकाकारां (ह. तं.). २ – कामफलप्रदं (ह. तं.). ३ – सर्वेन्द्रियाणि वश्यानि (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवममाकाशचक्रं षोडशदलकमलमूर्ध्वमुखं तन्मध्ये कर्णिकायां त्रिकूटाकारां तदूर्ध्वशक्तिं तां परमशून्यां ध्यायेत् तत्रैव पूर्णगिरिपीठं सर्वेच्छासिद्धिर्भवति ॥ ९ ॥

इति नवचक्रस्य विचारः ।

अथ षोडशाधारः कथ्यते ॥

तत्र प्रथमं पादाङ्गुष्ठाधारं तत्राग्रतस्तेजोमयं ध्यायेत् दृष्टिः स्थिरा भवति ॥ १० ॥

द्वितीयं मूलाधारं सूत्रं वामपार्ष्णिना निपीड्य स्थातव्यं तत्राग्नि-दीपनं भवति ॥ ११ ॥

तृतीयं गुदाधारं विकाससंकोचं निराकुञ्चयेत् अपानवायुः स्थिरो भवति ॥ १२ ॥

चतुर्थं मेढ्राधारं लिङ्गसंकोचनेन ब्रह्मग्रंथित्रयं भित्वा भ्रमर-गुहायां विश्रम्य तत ऊर्ध्वमुखे बिन्दुस्तम्भनं भवति । एषा वज्रोली प्रसिद्धा ॥ १३ ॥

पञ्चममोड्याणाधारयो बन्धनान्मलमूत्रसंकोचनं भवति ॥ १४ ॥

षष्ठे नाभ्याधारे ॐकारमेकचित्तेनोच्चारिते नादलयो भवति ॥ १५ ॥

सप्तमे हृदयाधारे प्राणं निरोधयेत् कमलविकासो भवति ॥ १६ ॥

अष्टमे कण्ठाधारे कण्ठमूलं चिबुकेन निरोधयेत् इडापिंगलयोर्वायुः स्थिरो भवति ॥ १७ ॥

नवमे घण्टिकाधारे जिह्वाग्रं धारयेत् अमृतकला स्रवति ॥ १८ ॥

दशमे ताल्वाधारे ताल्वन्तगर्भे लंबिकां चालनदोहनाभ्यां दीर्घीकृत्वा विपरीतेन प्रवेशयेत् काष्ठी भवति ॥ १९ ॥

एकादशमथ जिह्वाधारं तत्र जिह्वाग्रं धारयेत् सर्वरोगनाशो भवति ॥ २० ॥

४ – नादोदयमुपैति (का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशं भ्रूमध्याधारं तत्र चन्द्रमन्डलं ध्यायेत् शीतलतां याति ॥ २१ ॥

त्रयोदशं नासाधारं तस्याग्रं लक्षयेत् मनः स्थिरं भवति ॥ २२ ॥

चतुर्दशे नासामूलं कवाटाधारं तत्र दृष्टिं धारयेत् षण्मासाज्ज्योतिः-पुंजं पश्यति ॥ २३ ॥

पञ्चदशे ललाटाधारं तत्र ज्योतिःपुंजं लक्षयेत् तेजस्वी भवति ॥ २४ ॥

अवशिष्टे ब्रह्मरन्ध्रे आकाशचक्रं तत्र श्रीगुरुचरणाम्बुजयुग्मं सदावलोकयेत् आकाशवत्पूर्णो भवति । इतिषोडशाधारः ॥ २५ ॥

अथ लक्ष्यत्रयं ॥

मूलकन्दाद्दण्डलग्नां ब्रह्मनाडीं श्वेतवर्णां ब्रह्म-रन्ध्रपर्यंतं गतां संस्मरेत् । तन्मध्ये कमलतन्तुनिभां विद्युत्कोटि-प्रभामूर्ध्वगामिनीं तां मूर्तिं मनसा लक्षयेत्[6] तत्र सर्व-सिद्धिदा भवति ॥ २६ ॥

अथवा ललाटोर्ध्वे कोल्लाँटमण्डपे स्फुरत्काराकारं लक्षयेत् । अथवा भ्रमरगुहामध्ये आरक्तभ्रमराकारं लक्षयेदथवा कर्णद्वयं तर्जनीभ्यां निरोधयेत् ततः शिरो-मध्ये धूं धूं कारं नादं श्रृणोति अथवा चक्षुर्मध्ये नीलज्योति-रूपं पुतल्याकारं लक्षयेदित्यन्तर्लक्ष्यम् ॥ २७ ॥

बहिर्लक्ष्यं कथ्यते ॥

नासाग्रात् बहिरंगुलचर्तुष्टये नीलज्योतिः-संकाशं लक्षयेत् । अथवा नासाग्रात् षडंगुल अधोवायु-तत्वं धूम्रवर्णं लक्षयेदथवा अष्टांगुले आरक्तं तेजस्तत्वं लक्षयेत् अथवा दशाङ्गुले कल्लोलवदापस्तत्वं लक्षयेत् । अथवा नासाग्रात् द्वादशाङ्गुले पीतवर्णं पार्थिवतत्वं लक्षयेदथवा आकाशमुखं दृष्ट्वावलोकयेत्

५—धारयेत् (ह.). ६—ध्यायेत् (ह.). ७—गोल्ललाट (ह.). ८—द्वयमारक्तं तेजस्तत्वं (ह. तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किरणानाकुलितं पश्यति एवं निर्मलीकरणम् । अथवोर्ध्वं-दृष्ट्यान्तरालं लक्षयेत् ज्योतिर्मुखानि पश्यति अथवा यंत्रं तत्राकाशं लक्षयेदाकाशसदृशं चित्तं मुक्तिप्रदं भवति अथवा दृष्ट्यान्तस्तप्तकांचनसंनिभां भूमिं लक्षयेत् दृष्टिः स्थिरा भवति । इत्यनेकविधं बहिर्लक्ष्यम् ।। २८ ।।

अथ मध्यमं लक्ष्यं कथ्यते ।।
श्वेतवर्णं वा रक्तवर्णं वा कृष्णवर्णं
वा अग्निशिखाकारं वा ज्योतिरूपं वा विद्युदाकारं सूर्यमण्डलाकारं
वा अर्द्धचन्द्राकारं वा यथेष्टस्वपिण्डमात्रं
स्थानवर्जितं मनसा लक्षयेत् इत्यनेकविधं मध्यमं लक्ष्यम् ।। २९ ।।

अथ व्योमपञ्चकं लक्षयेत् ।। आकाशं पराकाशं महाकाशं तत्वाकाशं सूर्याकाशमिति व्योमपञ्चकम् । बाह्याभ्यन्तरेऽत्यन्तं निर्मलं निराकारमाकाशं लक्षयेत् । अथवा बाह्याभ्यन्तरेऽत्यन्तान्धकारनिभं पराकाशमवलोकयेत् । बाह्याभ्यन्तरे कालानलसंकाशं महाकाशमवलोकयेत् । बाह्याभ्यन्तरे निजतत्वस्वरूपं तत्वाकाशवलोकयेत् । अथवा बाह्याभ्यन्तरे सूर्यकोटिसदृशं सूर्याकाशमवलोकयेत् । एवं व्योम-पञ्चकावलोकनेन व्योमसदृशो भवति ।। ३० ।।

उक्तञ्च :—

नवचक्रं कलाधारं त्रिलक्ष्यं व्योमपञ्चकम् ।
सम्यगेतन्न जानाति स योगी नामधारकः ।। ३१ ।।

अथ अष्टाङ्ग योगः ।

यमनियमासनप्राणायामप्रत्याहार-धारणाध्यानसमाधयोऽष्टाङ्गानि । यम इति उपशमः

-किरणा आकुलितं तटं (तं.). १०–तत्र (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेन्द्रियजयः आहार - निद्रा - शीत - वातातपजयश्चैवं शनैः शनै साधयेत् ।। ३२ ।।

नियम इति मनोवृत्तीनां नियमनमिति एकान्तवासो निःसंगतौ-दासीन्यं यथा - प्राप्ति - सन्तुष्टिर्वैरस्यं गुरुचरणावरूढत्वमिति नियमलक्षणम् ।। ३३ ।।

आसनमिति स्वस्वरूपे समासन्नता । स्वस्तिकासनं पद्मासनं सिद्धासनमेतेषां मध्ये यथेष्टमेकं विधाय सावधानेन स्थातव्यं इत्यासनलक्षणम् ।। ३४ ।।

प्राणायाम इति प्राणस्य स्थिरता रेचक - पूरक - कुम्भक-संघट्टकरणानि चत्वारि प्राणायाम - लक्षणम् ।। ३५ ।।

प्रत्याहारमिति चैतन्यतरङ्गीणां[11] प्रत्याहरणं यथा नानाविकारग्रसनोत्पन्न-विकारस्यापि निवृत्तिः निर्भातीति प्रत्याहारलक्षणम् ।। ३६ ।।

धारणेति सबाह्याभ्यन्तर एकमेव निजतत्वस्वरूपमेवान्तः-करणेन साधयेत् यथा यद्यदुत्पद्यते तत्तन्निराकारे धारयेत् स्वात्मानं निर्वातदीपमिव धारयेदिति धारणालक्षणम् ।। ३७ ।।

अथ ध्यानमिति ।। अस्ति कश्चन परमाद्वैतस्य भावः स एव आत्मेति यथा यद्यत्स्फुरति तत्तत्स्वरूपमेवेति भावयेत् सर्वभूतेषु समदृष्टिश्चेति ध्यानलक्षणम् ।। ३८ ।।

अथ समाधिलक्षणम् । सर्वतत्वानां समावस्था निरुद्यमत्वमनायास-स्थितिमत्त्वमिति समाधिलक्षणम् ।। इति अष्टाङ्गयोगलक्षणम् ।।

।। इति श्रीगोरक्षनाथकृतौ सिध्दसिध्दान्तपद्धतौ पिण्डविचारो नाम द्वितीयोपदेशः ।। २ ।।

---

११ – तुरङ्गाणां (ह. का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयोपदेशः

अथ पिण्ड-संवित्तिः कथ्यते ।
पिण्डमध्ये चराचरौं यो जानाति
स योगी पिण्ड-संवित्तिर्भवति ।। १ ।।

कूर्मः पादतले वसति पातालं पादाङ्गुष्ठे तलातलमङ्गुष्ठाग्रे महातलं पृष्ठे रसातलं गुल्फे सुतलं जङ्घायां वितलं जान्वोः अतलमुर्वोरेवं सप्तपातालं रुद्रदेवताधिपत्ये तिष्ठति पिण्डमध्ये क्रोधरूपी भावः स एव कालाग्निरुद्रः ।। २ ।।

भूर्लोकं गुह्यस्थाने भुवर्लोकं लिङ्गस्थाने स्वर्लोकं नाभिस्थाने एवं लोकत्रये इन्द्रो देवता पिण्डमध्ये सर्वेन्द्रियनियामकः स एवेन्द्रः ।। ३ ।।

दण्डाङ्कुरे महर्लोकः दण्डकुहरे जनो लोकः दण्डनाले तपो लोकः मूलकमले सत्यलोकः एवं लोकचतुष्टये ब्रह्मादि-देवता पिण्डमध्ये अनेकमानाभिमानस्वरूपी तिष्ठति ।। ४ ।।

विष्णुलोकः कुक्षौ तिष्ठति तत्र विष्णुर्देवता पिण्डमध्येऽनेक-व्यापारकारको भवति । हृदये रुद्रलोकः तत्र रुद्रो देवता पिण्डमध्ये उग्रस्वरूपी तिष्ठति । वक्षःस्थले ईश्वरलोकः तत्र ईश्वरो देवता पिण्डमध्ये तृप्तिस्वरूपी तिष्ठति । कण्ठमध्ये नीलकण्ठो लोकस्तत्र नीलकण्ठो देवता पिण्डमध्ये नित्यं तिष्ठति । तालुद्वारे शिवलोकस्तत्र शिवो देवता पिण्डमध्येऽनुपमस्वरूपी तिष्ठति । लम्बिकामूले भैरवलोकस्तत्र भैरवो देवता पिण्डमध्ये सर्वोत्तमस्वरूपी तिष्ठति ।। ललाट-मध्येऽनादिलोकस्तत्रानादि-देवता पिण्डमध्ये आनन्दपरा-

१ – महातलं पादपृष्ठे (ह. नं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हन्तास्वरूपी तिष्ठति ।। [2]श्रृङ्गारे कुललोकस्तत्र कुलेश्वरो देवता पिण्डमध्ये आनंदस्वरूपी तिष्ठति । शंखमध्ये नलिनीस्थाने अकुलेश्वरो देवता पिण्डमध्ये निरभिमानावस्था तिष्ठति । ब्रह्मरन्ध्रे परब्रह्म - लोकस्तत्र परब्रह्म देवता पिण्डमध्ये परिपूर्णदशा तिष्ठति । ऊर्ध्वकमले परापर - लोकस्तत्र परमेश्वरो देवता पिण्डमध्ये परापरभावस्तिष्ठति । त्रिकूटस्थाने शक्तिलोक-स्तत्र पराशक्तिर्देवता सर्वासां सर्व - कर्तृत्वावस्था तिष्ठति । एवं पिण्डमध्ये सप्तपातालसहितैकविंशतिब्रह्माण्ड-स्थान-विचारः ।। ५ ।।

सदाचारतत्वे ब्राह्मणाः वसन्ति शौर्ये क्षत्रियाःव्यवसाये वैश्याः सेवाभावे शूद्राश्चतुषष्टिकलास्वपि चतुःषष्टिवर्णाः ।। ६ ।।

अथसप्त समुद्राः सप्त द्वीपाः कथ्यन्ते ।
मज्जायां जम्बूद्वीपः [3]अस्थिषु शक्तिद्वीपः
शिरासु सूक्ष्मद्वीपः त्वक्षु क्रौञ्चद्वीपः
रोमसु गोमयद्वीपः नखेषु श्वेतद्वीपः मांसे (अस्थिनि) प्लक्ष-द्वीपः एवं सप्तद्वीपाः ।। ७ ।।

मूत्रे क्षार-समुद्रः लालायां क्षीर-समुद्रः कफे दधि-समुद्रः मेदसि घृत-समुद्रः वसायां मधु-समुद्रः रक्ते इक्षु-समुद्रः शुक्रेऽमृत –समुद्रः एवं सप्तसमुद्राः ।। ८ ।।

नवखण्डाः नव द्वारेषु वसन्ति । [4]भारतखण्डः काश्मीरखण्डः [5]कर्परखण्डः श्रीखण्डः शंखखण्डः एकपादखण्डः गान्धारखण्डः कैवर्तकखण्डः महामेरुखण्डः एवं नवखण्डाः ।। ९ ।।

२–नास्ति वाक्यमिदम् (यो. तं). ३–शाकद्वीपः (ह.), शाल्मलिद्वीपः (का.), मस्तिष्के शाकद्वीपः (तं). ४–भाई खण्डा (यो.). ५–खर्वखण्डः (तं.), कर्परखण्डः (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेरुपर्वतो मेरुखण्डे वसति कैलासो ब्रह्मकपाटे वसति हिमालयः पृष्ठे मलयो वामकन्धरे मन्दरो दक्षिणकन्धरे विन्ध्यो दक्षिणकर्णे मैनाकः वामकर्णे श्री-पर्वतो ललाटे एवमष्ट कुलपर्वताः अन्ये उपपर्वताः सर्वाङ्गुलिषु वसन्ति ॥ १० ॥

पीनसा गंगा यमुना चन्द्रभागा सरस्वती । पिर्पासा शतरुद्रा च श्रीरात्रिश्चैव नर्मदा एवं नव नद्यो नवनाडीसु वसन्ति ॥ ११ ॥

अन्या उपनद्यः कुल्योपकुल्याः द्विसप्तति-सहस्र-नाडीसु वसन्ति ॥ १२ ॥

सप्तविंशति नक्षत्राणि द्वादश राशयः नव ग्रहाः पञ्च-दश तिथयः एते अन्तर्वलये द्विसप्तति-सहस्र-स्वहस्त-कोष्ठेषु वसन्ति । अनेकतारामण्डलं ऊर्मिषु वसन्ति । त्रयस्त्रिंशत्-कोटि-देवता बाहुरोमकूपेषु वसन्ति । अनेकपीठोपपीठकाः रोम-कूपेषु वसन्ति । देवदानव-यक्ष-राक्षस-पिशाच-भूतप्रेताः अस्थिसन्धिषु वसन्ति । कुलनागा वक्षसि वसन्ति । अन्ये सनकादिमुनिसंघाः कक्षरोमकूपेषु वसन्ति । अन्ये पर्वता उदर-लोमसु वसन्ति । गन्धर्व-किन्नर-किंपुरुषा अप्सरसो गणा उदरे वसन्ति । अन्याः खेचरी-लीला-मातरः शक्तयः उग्रदेवता वायुवेगे वसन्ति । अनेकमेघाः अश्रुपाते वसन्ति । अनेकतीर्थानि मर्मस्थाने वसन्ति । अनन्तासिद्धाः मतिप्रकाशे वसन्ति । चन्द्रसूर्यौ नेत्रद्वये वसतः । अनेक-वृक्षलता-गुल्मतृणानि जंघारोमककूपस्थाने वसन्ति । अनेककृमिकीटपतङ्गाः पुरीषे वसन्ति ॥ १३ ॥

यत्सुखं तत्स्वर्गं यद्दुःखं तन्नरकं यत्कर्म तद्बंधनं यन्निर्वि-कल्पं तन्मुक्तिः स्वस्वरूपदशायां निद्रादौ स्वात्मजागरः शान्तिर्भवति । एवं सर्वदेहेषु विश्वस्वरूपः परमेश्वरः

६–दण्डे (ह. का.). ७–पीतसा (तं.). ८–वितस्ता (का.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमात्मा अखण्डस्वभावेन घटे घटे चित्स्वरूपी तिष्ठति । एवं पिण्डसंवित्तिर्भवति ॥ १४ ॥

॥ इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ
पिण्डसंवित्ति र्नाम तृतीयोपदेशः ॥ ३ ॥

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थोपदेशः

अथपिण्डाधारः कथ्यते ॥

अस्ति काचिदपरम्परा संवित्स्वरूपा
सर्वापिण्डाधारत्वेन नित्यप्रबुद्धा निजा शक्तिः
प्रसिद्धा कार्यकारणकर्तृणामुत्थान-दशांकुरोन्मीलनेन
कर्तारं करोति अतएवाधारशक्तिरिति कथ्यते ।
अत्यन्तं निजप्रकाश – स्वसंवेदानुभवैक्यगम्यमान – शास्त्र
लौकिक – साक्षात्कार – साक्षिणी सा परोचिद्रूपिणी
शक्तिर्गीयते । सैव शक्ति र्यदा सहजेन स्वास्मिन्नुन्मीलिन्यां
निरुत्थानदशायां वर्तते तदा शिवः सैव भवति ॥ १ ॥

अतएव कुलाकुलस्वरूपा सामरस्य – निज – भूमिका निगद्यते ॥ २ ॥

कुलमिति । परासत्ताहन्ता – स्फुरत्ता – कलास्वं-
रूपेण सैव पञ्चधा विश्वस्याधारत्वेन तिष्ठति ॥ ३ ॥

अतएव परापरा निराभासावभासकात्प्रकाशस्वरूपा या सा परा ॥ ४ ॥

अनादि – संसिद्धा परमाद्वैत – परमेकमेवास्तीति या
अङ्गीकारं करोति सा सत्ता ॥ ५ ॥

अनादिनिधनोऽप्रमेय – स्वभावः किरणानन्दोऽस्म्यहमि-
त्यहं – सूचनशीला या सा पराऽहन्ता ॥ ६ ॥

स्वानुभव – चित्तचमत्कार – निरुत्थान – दशां प्रस्फुटी
करोति या सा स्फुरत्ता ॥ ७ ॥

नित्य – शुद्ध – बुद्ध – स्वरूपस्य स्वयं प्रकाशत्वमाकलयतीति
या सा पराकलेति उच्यते ॥ ८ ॥

१–अनन्तराधार (ह.). २–पराचिद्रूपिणी (ह.). ३–पराभासत्वादहन्ता सत्ता स्फुरत्ता कुला (यो.). ४–संवित् (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अकुलमिंति । जातिवर्ण – गोत्राद्यखिल – निमित्तत्वेनैकमेवास्तीति प्रसिद्धं ।

तथा चोक्तमुमामहेश्वरसंवादे :–

निरुत्तरेऽनन्यत्वादखण्डत्वादद्वयत्वादनन्याँश्रयत्वाद्
निर्धामत्वादनामत्वादकुलं स्यान्निरुत्तरमिति ॥ ९ ॥

एवं कुलाकुल–सामरस्य–प्रकाश–भूमिका – स्फुटीकरणे एकैव समर्था या साऽपरम्परा शक्तिरेवावशिष्यते । अपरम्परं निखिल–विश्वप्रपञ्चजालं परं तत्त्वं सम्पादयत्येकीकरोत्य-पराम्पराशक्तिराशावती प्रसिद्धा ॥ १० ॥

उक्तं ललित - स्वच्छन्दे :—

अकुलं कुलमाधत्ते कुलं चाकुलमिच्छति ।
जल - बुद्बुदवद्-न्यायादेकाकारः परः शिवः ॥ ११ ॥

अतएवैकाकार एवानन्त - शक्तिमान् निजानन्दतयावस्थि-तोऽपि नानाकारत्वेन विलसन् स्वप्रतिष्ठां स्वयमेव भजतीति व्यवहारः ।

उक्तं प्रत्यभिज्ञायाम् :—

अलुप्त - शक्तिमान्नित्यं सर्वाकारतया स्फुरन् ।
पुनः स्वेनैव रूपेण एक एवावशिष्यते ॥ १२ ॥

अतएव परमकारणं परमेश्वरः परात्परः शिवः स्वरूपतया सर्वतोमुखः सर्वाकारतया स्फुरितुं शक्नोतीत्यतः शक्तिमान् ।

उक्तं वामकेश्वरतन्त्रे :—

शिवोऽपि शक्तिरहितः शक्तः कर्तुं न किञ्चन ।
स्वशक्त्या सहितः सोऽपि सर्वस्याभासको भवेत् ॥ १३ ॥

अतएवानन्त - शक्तिमान् परमेश्वरः विश्वसंवित्स्वरूपी विश्वमयो भवतीति प्रसिद्धं सिद्धानां च परापर - स्वरूपा कुण्डलिनी

५–अनाशनात् (का.), अनाश्रयात् (तं.). ६–निरन्तरं (का.). ७–अपराशक्ति (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्तते । अतस्ते पिण्डासिद्धाः प्रसिद्धाः । सा कुण्डलिनी प्रबुद्धाऽप्रबुद्धा चेति द्विधा । अप्रबुद्धेति तत्तत्पिण्डे चेतन-रूपा (स्वभावेन नाना-चिन्ता–व्यापारोद्यमप्रपंचरूपा) कुटिल-स्वभावा कुण्डलिनी ख्याता । सैव योगिनां तत्तद्विलसितविकाराणां निवारणोद्यम-स्वरूपा कुण्डलिन्यूर्ध्वगामिनी सुप्रसिद्धा भवति ॥ १४ ॥

ऊर्ध्वामितं । सर्व-तत्वान्यपि स्व-स्वरूपमेवेत्यूर्ध्वे वर्तते अतएव सा विमर्शरूपिणी योगिनः स्व-स्वरूपमवगच्छन्तीति सुप्रसिद्धा ॥ १५ ॥

तथा चोक्तमेवरूलकं :—

ध्यशक्ति-प्रबोधेन अधः-शक्ति-निकुञ्चनात् ।
ऊर्ध्वे-शक्ति-निपातेन प्राप्यते परमं पदम् ॥ १६ ॥

एकैव सा मध्योर्ध्वधः-प्रभेदेन त्रिधा भिन्ना शक्तिरभि-धीयते ॥ १७ ॥

बाह्येन्द्रिय-व्यापार-नाना-चिन्तामया सैवाधः-शक्तिरुच्यते । अतएव ये योगिनः तस्या आकुञ्चनं मूला-धार-बन्धनात् सिद्धं स्यात् । यस्माच्च चराचरं जगदिदं चिदचिदात्मकं प्रभवति । तदेव मूलाधारं संविल्प्रसरं प्रसिद्धम् ॥ १८ ॥

उक्तं शिवानन्दाचार्यैः :—

सर्व-शक्ति-प्रसर-संकोचाभ्यां जगत्सृष्टिः संहृतिश्च भवत्येव न सन्देहः तस्मात्तां मूलमि-त्युच्यते । अतः प्रायेण सर्वसिद्धाः मूलाधार-रता भवन्ति ॥ १९ ॥

तरङ्गित-स्वभावं जीवात्मानं वृथा भ्रमन्तमपि स्वप्रकाशमध्ये स्व-स्वरूपतया सर्वदा धारयितुं समर्था या सा मध्याशक्तिः कुण्डलिनी गीयते ।
स्थूल-सूक्ष्म-रूपेण महासिद्धान्तं प्रतीयते इति निश्चयः ॥ २० ॥

८–आकुञ्चने रता यस्याकुञ्चन (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थूलेति निखिल-ग्राह्याधार-ग्राह्यस्वरूपापि पदार्थान्तरैं-भ्राम्यमाणा इव तद्रूपा वर्तते सा कुण्डलिनी साकार-स्थूला पुनस्त्वियमेव स्व-प्रसार-चातुर्यतया वर्तमाना योगिनां परानन्दतया कुण्डलिनी या निश्चयभूता वर्तते सा सूक्ष्मा निराकारा प्रबुद्धा महासिद्धानां मते प्रसिद्धा ॥ २१ ॥

उक्तं तत्वसारे :—

सृष्टिः कुण्डलिनी ख्याता द्विधा भावगता तु सा ।
एकधा स्थूलरूपा च लोकानां प्रत्यया(गा)त्मिका ॥ २२ ॥

अपरा सर्वगा सूक्ष्मा व्यांप्तिव्यापक-वर्जिता ।
तस्या भेदं न जानाति मोहितः प्रत्ययेन तु ॥ २३ ॥

तस्मात्सूक्ष्मा परा संवित्स्वरूपा मध्याशक्तिः कुण्डलिनी योगिभिर्देह-सिद्ध्यथ सद्गुरु-मुखाज्ज्ञात्वा स्व-स्वरूप-दशायां प्रबोधनीया ॥ २४ ॥

अथ ऊर्ध्व-शक्तिनिपातः कथ्यते ।

सर्वेषां तत्वानामुपरि-वर्तमानत्वान्निर्नाम परमं पदमेव ऊर्ध्वं प्रसिद्धं तस्याः स्व-संवेदन-नाना-साक्षात्कारसूचनशीला या ऊर्ध्व-शक्तिरभिधीयते । तस्याः निपातनमिति स्व-स्वरूप-द्विधा-भास-निरासः किन्तु स्व-स्वरूपाखण्डत्वेन भवति ॥ २५ ॥

उक्तं च —

शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरः शिवः ।
अन्तरं नैव जानीयाच्चन्द्रचन्द्रिकयोरिव ॥ २६ ॥

अत ऊर्ध्व-शक्ति-निपातेन महासिद्ध-योगिभिः परमपदं प्राप्यत इति सिद्धम् ॥ २७ ॥

९—चिद्रूपा (ह.). १०—व्याप्य (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तञ्च :—

सत्वे सत्वे सकलरचना राजते संविदेका ।
तत्त्वे तत्त्वे परम - महिमा संविदेवावभाति ।। २८ ।।

भावे भावे बहुल तरला लम्पटा संविदेषा ।
भासे भासे भजन—चतुरा बृंहिता संविदेव ।। २९ ।।

किमुक्तं भवति परापर—विमर्शरूपिणी संविन्नाना—शक्ति—रूपेण निखिल—पिण्डाधारत्वेन वर्तते इति सिद्धान्तः ।। ३० ।।

।। इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ
पिण्डाधारो नाम चतुर्थोपदेशः ।। ४ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमोपदेशः

अथ पिण्डपदयोः समरसकरणं कथ्यते—

महासिद्धयोगिभिः पूर्वोक्तक्रमेण परपिण्डादिस्वपिण्डान्तं ज्ञात्वा परमपदे समरसं कुर्यात् ॥ १ ॥

परमपदमिति स्वसंवेद्यं अत्यन्ताभासाभासकमयं ॥ २ ॥

उक्तं तत्त्वसंहितायाम्:—

यत्र बुद्धिर्मनो नास्ति तत्त्वविज्ञापरा कला ।
ऊहापोहौ न कर्तव्यौ वाचा तत्र करोति किम् ॥
वाग्मिना गुरुणा सम्यक् कथं तत्पदमीयते ।
तस्मादुक्तं शिवेनैव स्वसंवेद्यं परंपदम् ॥ ३ ॥

अतएव नानाविध–विचारचातुर्य–वर्चसा विस्मेयां गत्वा गुरुचरणरत[3]त्वात् निर्णीतत्वात् स्वसंवेद्यमेव परमं पदम् प्रसिद्धमिति सिद्धान्तः ॥४ ॥

गुरुरत्र सम्यक् सन्मार्गदर्शनशीलो भवति । सन्मार्गो योगमार्गस्तदितरः पार्षंडमार्गः ।

तदुक्तमादिना[4]थेन:—

योगमार्गेषु तंत्रेषु दीक्षितास्तांश्च दूषकाः ।
ते हि पार्षंडिनः प्रोक्ताः तथा तैः सहवासिनः ॥ ५ ॥

यस्मिन् दर्शिते सति तत्क्षणात् स्वसंवेद्यसाक्षात्कारः समुत्पद्यते । ततो गुरुरेवात्र कारणमुच्यते ॥ ६ ॥

तस्माद्गुरुकटाक्षपातात् स्वसंवेद्यतया च महासिद्धयोगिभिः स्वकीयं पिण्डं निरुत्थानानुभवेन समरसं क्रियते इति सिद्धान्तः ॥ ७ ॥

१–चर्चा (ह.). २–सारंग (तं.). ३–कृपातत्वमात्रेण (हं.), गुरुचरणत्वात् निरुपाधिकत्वात् निर्निकेतत्वात् (तं.). ४–आचार्यस्वामिना (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद्यथा—निरुत्थानप्राप्त्युपायः कथ्यते ।
महासिद्धयोगिनः स्वस्वरूपतयानुसन्धानेन निजावेशो भवति
निजावेशान्निपीडित–निरुत्थान–दशा–महोदयः कश्चिज्जायते ।
ततः सच्चिदानन्द–चमत्कारात् अद्भुताकारप्रकाशप्रबोधो जायते ।
प्रबोधादखिलमेतद् द्वयाद्वय–प्रकटतया चैतन्यभासाभासकं परात्परं पदमेव प्रस्फुटं भवतीति सत्यं ॥ ८ ॥

अत एव महासिद्धयोगिभिः सम्यक् (उक्त) गुरुप्रसादं लब्ध्वाऽ—वधान–बलेनैक्यं भजमानैस्तत्क्षणात् परमं पदमेवानुभूयते ॥ ९ ॥

तदनुभवबलेन स्वकीयं सिद्धं सम्यक् निजपिण्डं परिज्ञात्वा तमेव परमपदे एकीकृत्य तस्मिन् प्रत्यावृत्यारूढेवाभ्यन्तरे स्वपिण्ड सिद्ध्यर्थं महत्त्वमनुभूयते ॥ १० ॥

निजपिण्डमिति स्वरूपकिरणानन्दोन्मेषमात्रं यस्योन्मेषस्य प्रत्याहरणमेव समरसकरणं भवति ॥ ११ ॥

अतएव स्वकीयं पिण्डं महारश्मिपुंजं स्वेनैवाकारेण प्रतीयमानं स्वानुसन्धानेन स्वस्मिन्नुररीकृत्य महासिद्धयोगिनः पिण्डसिद्ध्यर्थं तिष्ठन्तीति प्रसिद्धम् ॥ १२ ॥

अथ पिण्डसिद्धौ वेषः कथ्यते—

शंखमुद्राधारणञ्च केशरोमप्रधारणम् ।
अमरीपानममलं तथा मर्दनमुत्कटम् ॥ १३ ॥

एकान्तवासो दीक्षा च सन्ध्या जपमार्चया ।
ज्ञानभैरवमूर्तेस्तु तत्पूजा च सुरादिभिः ॥ १४ ॥

शंखाध्मातं सिंहनादं कौपीनं पादुका तथा ।
अङ्गवस्त्रं बहिर्वस्त्रं कम्बलं छत्रमद्भुतम् ॥ १५ ॥

५–भूतकरणं (तं.). ६–पिण्डपरीक्षा च स्व (ह.). ७–उत्तमम् (ह.).
८–जपममायया (ह.). ९–यथाविधिः (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैत्रं कर्मंडलुश्चैव भस्मना च त्रिपुण्ड्रकम् ।
कूर्यादेतान् प्रयत्नेन गुरुवन्दनपूर्वकम् ।
तेषां पिण्डसिद्धौ सत्यां सर्वसिद्धयः सन्निधाना भवन्ति ।। १७ ।।

उक्तञ्च :—

यस्मिन् ज्ञाते जगत्सर्वं सिद्धं भवति लीलया ।
सिद्धयः स्वयमायान्ति तस्माद् ज्ञेयं परमं पदम् ।। १८ ।।

परं पदं न वेषेण प्राप्यते परमार्थतः ।
देहमूलं हि वेषं स्याल्लोकप्रत्ययहेतुकम् ।। १९ ।।

लोके निकृष्टमुत्कृष्टं परिगृह्य पृथक् कृतम् ।
तत्स्वधर्म इति प्रोक्तो योगमार्गे विशेषतः ।। २० ।।

योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ ।। २१ ।।

शास्त्रेष्वन्येषु सर्वेषु शिवेन कथितः पुरा ।
योगः सन्नहनोपायो ज्ञानंसंगतियुक्तिषु ।। २२ ।।

लोके निकृष्टं सततं यं वा यं वा प्रकुर्वतो ।
तं वा तं वा वर्जयन्ति लोकज्ञानबलेन तु ।। २३ ।।

मनुष्याणां च सर्वेषां प्राक्संस्कारवशादिह ।
शास्त्र—युक्ति—समाचारः क्रमेण भवति स्फुटम् ।। २४ ।।

एवं पिण्डे संसिद्धे ज्ञानप्राप्त्यर्थं तच्च परमपदं महासिद्धानां मतं परिज्ञाय तस्मिन्नहंभावे जीवात्मा च सहजसंयम—सोपायाद्वैतक्रमेणोपलक्ष्यते ।। २५ ।।

तत्र सहजमिति ।
विश्वातीतं परमेश्वरं विश्वरूपेणावभासमानमिति
एकमेवास्तीति स्वस्वभावेन यद् ज्ञानं तत्सहजं प्रसिद्धम् ।। २६ ।।

१०-ध्यान (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संयम इति । सावधानानां प्रस्फुरद्-व्यापाराणां निजवृत्तीनां संयमनं कृत्वा आत्मनि धीयते इति संयमः ॥ २७ ॥

सोपायमिति । स्वयमेव प्रकाशमयं स्वेनैव स्वात्मन्येकीकृत्य सदा तत्त्वेन स्थातव्यम् ॥ २८ ॥

अद्वैतमिति । अकर्तृतयैव योगी नित्यतृप्तो निर्विकल्पः सदा निरुत्थानत्वेन तिष्ठति ॥ २९ ॥

उक्तञ्च :—

सहजं स्वात्मसंवित्तिः संयमः स्वात्[11]मनिग्रहः ।
सोपायः स्वस्य विश्रान्तिरद्वैतं परमं पदम् ॥ ३० ॥

तज्ज्ञेयं सद्गुरोर्वक्त्रात् नान्यथा शास्त्रकोटिभिः ।
न तर्कशब्दविज्ञानान्नाचाराद्वेदपाठना[12]त् ॥ ३१ ॥

वेदान्तश्रवणान्नैव तत्त्वमस्यादिबोधनात् ।
न हंसोच्चारणाज्जीवब्रह्मणोरैक्यभावनात् ॥ ३२ ॥

न ध्यानान्न लयाल्लीनः सर्वज्ञ[13]ः सिद्धिपारगः
स्वेच्छो योगी स्वयंकर्ता लीलया चाजरोऽमरः ॥ ३३ ॥

अवध्यो देवदैत्यानां क्रीडते भैरवो यथा ।
इत्येवं निश्चलो योऽसौ क्रमादाप्नोति लीलया ॥ ३४ ॥

असाध्याः सिद्धयः सर्वाः सत्[14]यमीश्वरभाषितम् ।
प्रथमे त्वरोगतासिद्धिः सर्वलोकप्रियो भवेत् ।
कांक्षते दर्शनं तस्य स्वात्मारूढस्य नित्यशः ॥ ३५ ॥

[15]कृतार्थः स्याद्द्वितीये तु कुरुते सर्वभाष[16]या ।
तृतीये दिव्यदेहस्तु व्यालैर्व्याघ्रैर्न बाध्यते ॥ ३६ ॥

---

११ – स्व स्व निग्रहः (ह.). १२ – पारगात् (ह.). १३ – लयाल्लीनात् मौन कर्म समाश्रयात् लीने पिण्डे भवेद् योगी (तं.). १४ – सद्गुरोः करुणां विना (ह.). १५ – कविता (तं.). १६ – भाषणं.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थे क्षुत्तृषानिद्राशीततापविवर्जितः ।
जायते दिव्ययोगीशो दूरश्रावी न संशयः ॥ ३७॥

वाक्सिद्धिः पञ्चमे वर्षे परकायप्रवेशनम् ।
षष्ठे न छिद्यते शस्त्रैर्वज्रपातैर्न बाध्यते ॥ ३८ ॥

वायुवेगी क्षितित्यागी दूरदर्शी च सप्तमे ।
अणिमादिगुणोपेतस्त्वष्टमे वत्सरे भवेत् ॥ ३९ ॥

नवमे वज्रकायः स्यात् खेचरो दिक्चरो भवेत् ।
दशमे पवनाद्वेगी यत्रेच्छा तत्र धावति ॥ ४० ॥

सम्यगेकादशे वर्षे सर्वज्ञः सिद्धिभाग्भवेत् ।
द्वादशे शिवतुल्योऽसौ कर्ता हर्ता स्वयं भवेत् ॥ ४१ ॥

त्रैलोक्ये पूज्यते सिद्धः सत्यं श्रीभैरवो यथा ।
एवं द्वादशवर्षेषु सिद्धयोगी महाबलः ॥
जायते सद्गुरोः पादप्रभावान्नात्र संशयः ॥ ४२ ॥

गुरुकुलसन्तानश्चेति पञ्चधा प्रोक्तम्
आई–सन्तानं विलेश्वर–सन्तानं विभूति–सन्तानं नाथ–सन्तानं योगीश्वर–सन्तानश्चेति एषामपि सन्तानानां पृथक् पृथक् वैशिष्टयं वर्तते ॥ ४३ ॥

परमार्थतः सव पाञ्चभौतिकं । तज्जार्ताः पुरुषाः । (स्वबोध) सम्बोध-मात्रैकरूपः सशिवः । तदितरत्सर्वमज्ञानमव्यक्तं भवति तत्र शिवस्तु ज्ञानं ॥ ४४ ॥

एतेषामपि सन्तानानां केचित्स्वरूपपराङ्मुखाः वेश-मात्रसम्पन्नाः क्रयविक्रयादिकं कुर्वन्ति सन्तानभेदं प्रत्यन्योऽन्यमधः कुर्वन्ति योगमार्गं द्वेषयन्ति ॥ ४५ ॥

१७ – यत्रेच्छा तत्र धावति (यो.). १८ – न जाताः (ह.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजसा घोरसंकल्पाः कामुकाः अतिमन्यवेः ।
दाम्भिकाः मानिनः पापाः धिक्कुर्वन्त्यीश्वरप्रियान् ॥ ४६ ॥

साधुसङ्गम – सच्छास्त्र – परमानन्द – लक्षितान् ।
स्वेच्छाचारविहारैक – ज्ञानविज्ञानसंयुतान् ॥ ४७॥

यूयं दुष्टा वयं शिष्टा भ्रष्टा यूयं वयं तथा ।
इत्येवं परिवदन्ति संप्रमोहे निरन्तरम् ॥ ४८ ॥

पृथ्वी जलं तथा वह्निः वायुराकाशमेव च ।
एते सन्तानोदयास्तु सम्यगेव प्रकीर्तिताः ॥ ४९ ॥

काठिन्यश्चार्द्रता तेजो धावनं स्थिरता खलु ।
गुणान्येतानि पञ्चैव सन्तानानां क्रमात् स्मृताः ॥ ५० ॥

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः
एताश्च देवताः प्रोक्ताः सन्तानानां क्रमेण तु ॥ ५१ ॥

स्थूल – सूक्ष्म – कारणं तूर्यं तूर्यातीतमिति पञ्चावस्थाः क्रमेण लक्ष्यन्ते । एतेषामपि सर्वेषां विज्ञाता यः स योगी स सिद्ध-पुरुषः स योगीश्वरेश्वर इति परमरहस्यं प्रकाशितम् ॥ २२ ॥

अतएव सम्यक् निजविश्रान्तिकारकं महायोगिनं सद्गुरुं सेव-यित्वा सम्यक् सावधानेन परमं पदं सम्पाद्य तस्मिन् निज-पिण्डे (पिण्डं) समरसभावं कृत्वाऽत्यन्तं निरुत्थानेन सर्वानन्दतत्त्वे निश्चलं स्थातव्यम् । ततः स्वयमेव महासिद्धो भवतीति सत्यम् ॥ ५३ ॥

न विधिर्नैव वर्णश्च न वर्ज्यावर्ज्यकल्पना ।
न भेदो निधनं किञ्चिन्नाशौचं नोदकक्रिया ॥ ५४ ॥

योगीश्वरेश्वरस्यैवं नित्यतृप्तस्य योगिनः ।
चित्स्वात्मसुखविश्रान्तिभावलब्धस्य पुण्यतः ॥ ५५ ॥

---

१९ – अहिमन्यवः (यो.). २० – निषेधश्च (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यक् स्वभावविज्ञानात् क्रमाभ्यासान्न चासनात् ।
न वैराग्यान्न नैराश्यान्नाहार – प्राण – धारणात् ।। ५६ ।।

न मुद्रा–धारणाद्योगान्न मानकर्म–समाश्रयात् ।
न विरक्तौ वृथायासान्न कायक्लेशधारणात् ।। ५७

न जपान्न तपोध्यानान्न यज्ञात्तीर्थसेवनात् ।
न देवार्चनाश्रयाद्भक्त्या नाश्रमाणाञ्च पालनात् ।। ५८ ।।

न षड्दर्शनकेशादिधारणान्न च मुण्डनात् ।
नानन्तोपाययत्नेभ्यः प्राप्यते परम पदम् ।। ५९ ।।

एतानि साधनानि सर्वाणि दैहिकानि परित्यज्य परमपदेऽदैहिके स्थीयते सिद्धपुरुषैरिति ।। ६० ।।

तत्कथं । गुरुदृक्पातनात् प्रायो दृढानां सत्यवादिनां सा स्थितिर्जायते ।। ६१ ।।

कथनाच्छाक्तपाताद्वा पादावलाकनात् ।
प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम् ।। ६२ ।।

अतएव शिवेनोक्तम्—

न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोराधिकम् ।
शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः ।।६३।।

वाङ्मात्राद्वाथदृक्पातात् यः करोति च तत्क्षणात् ।
प्रस्फुटं शाम्भवं वेद्यं स्वसंवेद्यं परं पदम् ।। ६४ ।।

करुणाखड्गपातेन छित्वा पाशाष्टकं शि(प)शोः ।
सम्यगानन्दजनकः सद्गुरुः सोऽभिधीयते ।। ६५ ।।

निमिषार्धार्धपाताद्वा यद्वा पादावलोकनात् ।
स्वात्मानं स्थिरमाधत्ते तस्मै श्रीगुरवे नमः ।। ६६ ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाना-विकल्प-विश्रान्तिं कथया कुरुते तु यः ।
सद्गुरुः स तु विज्ञेयो न तु मिथ्या-विडम्बकः ॥ ६७ ॥

अतएव परमपदप्राप्त्यर्थं स सद्गुरुः सदा वन्दनीयः
गुरुरिति गृणाति शं[२१] सम्यक् चैतन्यविश्रान्तिमुपदिशति ॥
विश्रान्त्या स्वयमेव परात्परं परमपदमेव प्रस्फुटं भवति
तत्क्षणात्साक्षात्कारो भवति ॥ ६८ ॥

अतएव महासिद्धानां मते प्रोक्तं । वाग्मात्रेण वा दृक्पात-
मात्रेण वा सम्यगवलोकनेन वा तत्क्षणान्मुहुर्विश्रान्तिमत्तां
नयतीति (विश्रान्तियुक्तं करोतीति, ह)
यः स सद्गुरुर्भवति । नो चेन्निजविश्रान्तिं
विना पिण्डपदयोः समरसकरणं न भवतीति सिद्धान्तः ।
तस्मान्निजविश्रान्तिकारकः सद्गुरुरभिधीयते नान्यः ॥
पुनर्वागादि-शास्त्रदृष्ट्यानुमानतस्तर्क-मुद्रया श्रमिको[२२]
गुरुस्त्याज्यः ॥ ६९ ॥

उक्तञ्च :—

ज्ञानहीनो गुरुस्त्याज्यः मिथ्यावादी विडम्बकः ।
स्वविश्रान्तिं न जानाति परेषां स करोति किम् ॥ ७० ॥

शिलया किं परं पारं शिलासंघः प्रतार्यते ।
स्वयं तीर्णो भवेद्योऽसौ परान्निस्तारयत्यलम् ॥ ७१ ॥

विकल्पसागरात्घोराच्चिन्ताकल्लोलदुस्तरात् ।
प्रपञ्च-वासना-दुष्ट-(ग्रह) ग्राहजालसमाकुलात् ॥ ७२ ॥

वासना-लहरी-वेगाद्यः स्वं तारियतुं क्षमः[२३] ।
स्वस्थेनैवोपदेशेन निरुत्थानेन तत्क्षणात् ॥ ७३ ॥

२१–गुणातिशय (यो.), गुणातीतः (त.). २२–श्रामको (ह.). २३–नास्वस्थतरितुं क्षयः (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तारयत्येव दृक्पातात् कथनाद्वा विलोकनात् ।
तारिते स्वपदं धत्ते स्वस्वमध्ये स्थिरो भवेत् ॥ ७४ ॥

ततः स मुच्यते शिष्यो जन्मसंसारबन्धनात् ।
परानन्दमयो भूत्वा निष्कलः शिवतां व्रजेत् ॥ ७५ ॥

कुलानां कोटिकोटीनां तारयत्येव तत्क्षणात् ।
अतस्तं सद्गुरुं साक्षात् त्रिकालमभिवन्दयेत् ॥ ७६ ॥

सर्वाङ्गप्रणिपातेन स्तुवन्नित्यं गुरुं भजेत् ।
भजेनात्स्थैर्यमाप्नोति स्वस्वरूपमयो भवेत् ॥ ७७ ॥

किमत्र बहुनोक्तेन शास्त्रकोटिशतेन च ।
दुर्लभा चित्तविश्रान्तिर्विना गुरुकृपां पराम् ॥ ७८ ॥

चित्तविश्रान्तिलब्धानां योगिनां दृढचेतसाम् ।
स्वस्वमध्ये निमग्नानां निरुत्थानं विशेषतः ॥ ७९ ॥

निमिषात्प्रस्फुटं भाति दुर्लभं परमं पदम् ।
यस्मिन् पिण्डो भवेल्लीनः सहसा नात्र संशयः ॥ ८० ।

संवित्क्रिया-विकरणोदय-चिद्विलोलै[२५]-
विश्रान्तिमेव भजतां स्वयमेव भाति ।
ग्रस्ते स्ववेगनिचये पदपिण्डमैक्यं,
सत्यं भवेत्समरसं गुरुवत्सलानाम् ॥ ८१ ॥

॥ इति श्रीगोरक्षनाथकृतौ सिद्धसिद्धान्तपद्धतौ
पिण्डपदयोः समरसकरणं नाम पञ्चमोपदेशः ॥ ५ ॥

२४-सज्जनः (ह.). २५-सम्यक् स्वभावकिरणोदयचिद्विलास (तं.).

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठोपदेशः

अथ अवधूतयोगिलक्षणं कथ्यते :—

अवधूतयोगी नाम क इत्यपेक्षायामाह ।

यः सर्वान् प्रकृतिविकारान् अवधूनोतीत्यवधूतः । योगोऽस्यास्तीति योगी । धूञ् कम्पने इति धातुः कम्पनार्थे वर्तते । कम्पनं चालनं देह–दैहिक–प्रपंचादिषु विषयेषु संगतं मनः परिगृह्य तेभ्यः प्रत्याहृत्य स्वधाममहिम्नि परिलीन–चेताः प्रपञ्चशून्य आदिमध्यान्तनिधनभेदवर्जितः ॥ १ ॥

यकारो वायुबीजं स्याद्रकारो वह्निबीजकम् ।
तयोरभेदओंकारश्चिदाकारः प्रकीर्तितः ॥ २ ॥

तदेतद् व्यक्तमुच्यते :—

क्लेशपाशतरङ्गाणां कृन्तनेन विमुण्डनम् ।
सर्वावस्थाविनिर्मुक्तः सोऽवधूतोऽभिधीयते ॥ ३ ॥

निर्जेस्मरविभूतिर्यो योगी स्वाङ्गे विभूषितः ।
आधारे यस्य वारुढिः (ढः) सोऽवधूतोऽभिधीयते ॥ ४ ॥

लोकमध्ये स्थिरासीनः समस्त–कलनोज्झितः ।
कौपिनं खर्परोऽदैन्यं सोऽवधूतोऽभिधीयते ॥ ५ ॥

शं सुखं खं परं ब्रह्म शंखं सघट्टनाद् भवत् ।
सिद्धान्तं धारितं येन सोऽवधूतोऽभिधीयते ॥ ६ ॥

पादुका पदसंवित्ति मृगैत्वच् महाहतम् ।
वेलीं यस्य परा संवित्सोऽवधूतोऽभिधीयते ॥ ७ ॥

मेखला निवृत्तिर्नित्यं स्वस्वरूपं कटासनम्
निवृत्तिः षड्विकारेभ्यः सोऽवधूतोऽभिधीयते ॥ ८ ॥

